नं० ४८५६

नाम - आकाशभैरवतन्त्रकल्पे शरभसहस्रनामस्तोत्रम्

कर्त्ता - x

पत्र सं० - ८ पत्राली सं० x

विषयः - तन्त्रम्

श्रीरामसहस्रनामस्तोत्रम्

[illegible]

॥श्रीगणेशायनमः॥ ॥ अस्य श्रीशरभसहस्रनामस्तोत्रमहामंत्रस्य वामदेव ऋषिः जगतीछंदः। कालाग्नि
रुद्रोदेवता॥ अथवा कालाग्निरुद्र ऋषिः॥ अनुष्टुप्छंदः शरभसालुवपक्षिराजोदेवता॥ खंबीजं। स्वा
हाशक्तिः॥ फट्कीलकं॥ शरभेश्वरप्रीत्यर्थेजपेविनियोगः॥ ॐ खें खां खं फट् अंगुष्ठाभ्यांनमः॥ प्रा
णग्रहासि - हुं फट् तर्जनीभ्यां॰ सर्वशत्रुसंहरणाय मध्यमाभ्यां॰ शरभसालुवाय पक्षिराजाय
अनामिकाभ्यां॰ हुंफट् कनिष्ठिकाभ्यां॰॥ स्वाहाकरतलकरपृष्ठाभ्यां॰ एवं हृदयादि॥ ॐ भूर्भुवः
स्वरों इति दिग्बंधः॥ ध्यानं॥ चंद्रार्काग्नित्रिदृष्टिः कुलिशवरनखश्चंचलात्युग्रजिह्वः कालीदुर्गा च प
क्षौ हृदयजठरगो भैरवो वाडवाग्निः॥ ऊरुस्थौ व्याधिमृत्यू शरभवरखगश्चंडवातातिवेगः संह
र्ता सर्वशत्रून्स जयति शरभः सालुवः पक्षिराजः॥ एवं ध्यात्वा मनसा संपूज्य जपेत्॥ ॐ सर्वभूता
त्मभूतस्य हरस्यामिततेजसः॥ अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु॥१॥ यच्छ्रुत्वा मनुजव्याघ्रः सर्वान्कामानवाप्स्यति॥ स्थिरः स्थाणुः प्रभुर्भीमः प्रभवो वरदो वरः॥ सर्वात्मा सर्वविख्यातः सर्वः स हेरंब॰
१

व वंकरो भः ॥१॥ जटी चर्मी शिखंडी च सर्वांगः सर्व भावनः ॥ हरश्च हरिणाक्षश्च सर्व भूत हरः प्रभुः ॥२॥
प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ॥ श्मशान वासी भगवान्खचरो गोचरो घनः ॥३॥ अतिबाधो
महा कर्मा तपस्वी भूत भावनः ॥ उन्मत्त वेषः प्रच्छन्नः सर्व लोक प्रजा पतिः ॥४॥ महा रूपो महा कायो वृष
रूपो महा यशाः ॥ महात्मा सर्व भूतात्मा विश्व रूपो महा हनुः ॥५॥ लोक पालो ऽन्तर्हितात्मा प्रसादो हयग
र्दभी ॥ पवित्रश्च महांश्चैव नियमो नियमश्रियः ॥६॥ सर्व कर्मा स्वयंभूश्च आदिरादिकरो निधिः ॥ स
हस्राक्षो विरूपाक्षः सोमो नक्षत्र साधकः ॥७॥ सूर्य चंद्र गतिः केतुर्ग्रहो ग्रह पतिर्वरः ॥ अद्रिरद्र्या
लयः कर्त्ता मृग बाणार्पणो ऽनघः ॥८॥ महा तपा दीर्घ तपा अदीनो दीन साधनः ॥ संवत्सरकरो मं
त्री प्रमाणं परमं तपः ॥९॥ योगी योग्यो महा वीरो महा रेता महा तपाः ॥ सुवर्ण रेताः सर्वज्ञः सुबीजो वृ
ष वाहनः ॥१०॥ दशबाहुश्च निमिषो नील कंठ उमापतिः ॥ बहु रूपः स्वयं श्रेष्ठो बलि वैरोचनो ग
णः ॥११॥ गण कर्त्ता गण पतिर्दिग्वासाः काम एव च ॥ मंत्र वित्परमो मंत्रः सर्व भावकरो हरः ॥१२॥ क

मंडलुधरो धन्वी बाणहस्तः कपालवान्॥ अशनीशतघ्नीखड्गीपट्टिशी चायुधी महान्॥१३॥श्रुचिहस्तः सुरूप
श्च श्चतेजस्तेजस्करो निधिः॥उष्णीषी च सुवक्त्र उदग्रो विनयस्तथा॥१४॥दीर्घश्च हरिनेत्रश्च सुतीर्थः कृ
ष्ण एव च॥ शृगालरूपः सर्वार्थो मुंडः सर्वक मंडलुः॥१५॥अजश्च मृगरूपश्च गंधचारी कपर्द्यपि॥ऊ
र्ध्वरेता ऊर्ध्वलिंग ऊर्ध्वशायी नभस्थलः॥१६॥ त्रिजटश्चीरवासी च रुद्रसेनापतिर्विभुः॥ नक्तंच
2 रस्तिग्ममन्यु रहश्चारी सुवर्चसी॥१७॥ गजहा दैत्यहा चैव लोकधाता गुणाकरः॥ सिंहशार्दूलरूपश्च
आर्द्रचर्मांबरोवरः॥१८॥ कालयोगी महानाद सर्ववासाश्चतुष्पथः॥ निशाचरः प्रेतचारी भूतचा
री महेश्वरः॥१९॥ बहुरूपो बहुधनः सर्वाधारो मनोगतिः॥ नृत्यप्रियो नृत्यरतो नर्तकः सर्वमालयः
२०॥ घोरो महातपा ईशो नित्यो गिरिचरो नभः॥ सहस्रहस्तो विजयो व्यवसायो ह्यनिंदितः॥२१॥अ
मर्षणो महामर्षी यज्ञकामी मनोमयः॥ दक्षयज्ञापहारी च सुसहो मध्यमस्तथा॥२२॥तेजोपहारी
बलहा मुदितोप्यर्जितो भवः॥ गंभीरघोषो गंभीरो गंभीरबलवाहनः॥२३॥ न्यग्रोधरूपो न्यग्रोधो वृ हेरंब० २

सकर्त्ता स्वविद्धि भूः ॥ तीक्ष्णवाकुश्च हर्यश्वः सहायः सर्वकालवित् ॥ २४ ॥ विष्णुं प्रसादितो यज्ञः समु
द्रे वडवामुखः ॥ हुताशन सहायश्च प्रशांतात्मा हुताशनः ॥ २५ ॥ उग्रतेजा महातेजा जयो विजय
कालवित् ॥ ज्योतिषामयनं सिद्धिः संधिविग्रह एव च ॥ २६ ॥ शिखी दंडी जटी ज्वाली मूर्त्तिजो दु
र्धरो बली ॥ वैणवी पणवी ताली कालः कालकटंकटः ॥ २७ ॥ नक्षत्र विग्रह विधिर्गुणवृद्धिलयो
गमः ॥ प्रजापतिर्दिशां बाहुर्विभागः सर्वतोमुखः ॥ २८ ॥ वैरोचनो सुरगणो हिरण्यकवचोद्भवः ॥ अब्र
जो बालचारी च महाचारी स्तुतस्तथा ॥ २९ ॥ सर्वतूर्यनिनादी च सर्वनाद्यपरिग्रहः ॥ व्यालरूपो बि
लावासी हेममाली तरंगवित् ॥ ३० ॥ त्रिदशस्त्रिदशावासः सर्वबंधः विमोचनः ॥ बंधनस्त्वसुरेंद्राणां
युधिशत्रुविनाशनः ॥ ३१ ॥ सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ॥ प्रस्कंदनो विभागश्च अतु
ल्यो यज्ञभागवित् ॥ ३२ ॥ सर्वचारी सर्वकासो दुर्वासा वासवो भवः ॥ हेमो हेमकरो यज्ञः सर्ववीरो
नरोत्तमः ॥ ३३ ॥ लोहिताक्षो महाक्षश्च विजयाख्यो विशारदः ॥ संग्रहो विग्रह कर्म मोक्षः सर्वनिवास

नः॥३४॥ मुखोऽमुखश्च देहश्च देहर्द्धिः सर्वकामदः॥ सर्वकालप्रसादश्च सुबलो बलरूपधृक्॥३५॥ आकाश
निधिरूपश्च विपादी उरगः खगः॥ रौद्ररूपी पांसुरादिर्वसुरश्मिः सुवर्चसी॥३६॥ वसुवेगो महावेगो महाय
३ शो निशाकरः॥ सर्वभावप्रियावासी उपदेशकरो हरः॥३७॥ मनुरात्मा पतिर्लोकः संभोज्यश्च सहस्रशः
पक्षी च पक्षिरूपी च अतिदीप्तो विशांपतिः॥३८॥ उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः॥ वाम
देवश्च रामश्च पूर्वदक्षिण वामनः॥३९॥ सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः॥ भिक्षुश्च भिक्षु
रूपश्च विपणो मृदुरव्ययः॥४०॥ महासेनो विशाखश्च षष्टिभागो गवांपतिः॥ वज्रहस्तश्च विष्कंभी च
मूस्तंभन एव च॥४१॥ वृत्तो वृत्तकरः स्थाणुर्मधुर्मधुकरोचनः॥ वाचस्पत्यो वाजसनो नित्यमाश्र
मपूजितः॥४२॥ ब्रह्मचारी लोकचारी सर्वचारी विचारवित्॥ ईशान ईश्वरः कालो निशाचारी पिना
कधृक्॥४३॥ निमित्तस्थो निमित्तश्च नंदिर्नंदिकरो हरिः॥ नंदीश्वरश्च नंदी च नंदनो नंदवर्धनः॥४४॥ हरंबं
भगहारी निहंता च कालो ब्रह्मा पितामहः॥ चतुर्मुखो महालिंगश्चारुलिंगस्तथैव च॥४५॥ लिंगाध्य ३

योगाध्यक्षो क्षः सुराध्यक्षो युगावहः ॥ बीजाध्यक्षो बीजकर्त्ता अध्यात्मानुगतो बलः ॥४६॥ इतिहासः सकल्पश्च गौ
तमोथ निशाकरः ॥ दंभो ह्यदंभो वैदंभो वश्यो वश्यकरः कलिः ॥४७॥ लोककर्त्ता पशुपतिर्महाकर्त्ता ह्यनौ
षधः ॥ अक्षरं परमं ब्रह्म बलवाञ्छक्र एव च ॥४८॥ नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतिः ॥
बहुप्रसादः सुस्वप्नो दर्पणो त्वथ त्वमित्रजित् ॥४९॥ वेदकारो मन्त्रकारो विद्वान्समरमर्द्दनः ॥ महामेघनि
वासी च महाघोरो वशीकरः ॥५०॥ अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः ॥ वृषभः शंकरो नि
त्यो वर्चस्वी धूम्रलोचनः ॥५१॥ नीलस्तथांगलुब्धश्च शोभनो निरवग्रहः ॥ स्वस्तिदः स्वस्तिभावश्च भा
गी भागकरो लघुः ॥५२॥ उत्संगश्च महांगश्च महागर्भपरायणः ॥ कृष्णवर्णः सुवर्णश्च इंद्रियं सर्वदेहि
नां ॥५३॥ महापादो महाहस्तो महाकायो महायशाः ॥ महामूर्धा महामात्रो महानेत्रो निशालयः ॥५४॥
महांतको महाकर्णो महोष्ठश्च महाहनुः ॥ महानासो महाकंबुर्महाग्रीवः श्मशानभाक् ॥५५॥ महाव
क्षा महोरस्को ह्यंतरात्मा मृगालयः ॥ वंधरो लंबितोष्ठश्च महामायः पयोनिधिः ॥५६॥ महादंतो महा

दंष्ट्रो महाजिह्वो महामुखः ॥ महानखो महारोमा महाकेशो महाजटः ॥ ५७ ॥ प्रसन्नश्च प्रसादश्च प्रत्ययो
गिरिसाधनः ॥ स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ॥ ५८ ॥ वृक्षाकारो वृक्षकेतुरनलो वायु
वाहनः ॥ मंडली मेरुधामा च देवाधिपतिरेव च ॥ ५९ ॥ अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ॥
यजुःपादभुजो गुह्यः प्रकाशो जंगमस्तथा ॥ ६० ॥ अमोघार्थ प्रसादश्च अभिगम्यः सुदर्शनः ॥ उप
कारप्रियः शर्वः कनकः कांचनस्थिलः ॥ ६१ ॥ नाभिर्नन्दिकरो भानुः पुष्करः स्थपतिः स्थिरः ॥ द्वाद
शस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ॥ ६२ ॥ नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥ सगणो
गणकारश्च भूतवाहनसारथिः ॥ ६३ ॥ भस्मशायी भस्मगोप्ता भस्मभूतस्तथा गुणः ॥ लोकपा
लस्तथा लोको महात्मा सर्वपूजितः ॥ ६४ ॥ शुक्लस्त्रिशुक्लः संपन्नः शुचिर्भूतनिषेवितः ॥ आश्र
मस्थः क्रियावस्थो विश्वकर्ममतिर्वरः ॥ ६५ ॥ विशालशाखस्ताम्रोष्ठो ह्यंबुजालः सुनिश्च
लः ॥ कपिलः कपिलशुक्ल आयुश्चैव परोवरः ॥ ६६ ॥ गंधर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशार हेरवं० ४

द्रः॥ परश्वधायुधो देव अंधकारिः सुबांधव॥ ६७॥ तुंबवीणो महाक्रोध ऊर्ध्वरेता जलेशयः॥ उग्रो
वंशकरो वंशो वंशनादो ह्यनिंदितः॥ ६८॥ सर्वांगरूपो मायावी सुहृदो ह्यनिलो नलः॥ बंधनो बं
धकर्त्ता च सुबंधुरविमोचनः॥ ६९॥ मेषजारिः सुकमारिर्महादंष्ट्रो समो युधि॥ बकुरूवनिर्मि
तः शर्वः शंकरः शंकरोवरः॥ ७०॥ अमरेशो महादेवो विश्वदेवः सुरारिहा॥ निःसंगश्चाहिर्बुध्न
श्चेकितानो हरिस्तथा॥ ७१॥ अजैकपात्कपाली च त्रिशंकुरजितः शिवः॥ धन्वंतरी धूमकेतुः
स्कंदो वैश्रवणस्तथा॥ ७२॥ धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो वसुः॥ प्रभावः सर्वगो वायु
रर्यमा सविता रविः॥ ७३॥ उग्रदंष्ट्रो विधाता च मांधाता भूतभावनः॥ रतिस्तीर्थी च वाग्मी च स
र्वकर्मगुणावहः॥ ७४॥ पद्मवक्त्रो महावक्त्रश्चंद्रवक्त्रो मनोरमः॥ बलवांश्चोपशांतश्च पुराणः पु
ण्यचंचरी॥ ७५॥ कुरुकर्त्ता कालरूपी कुरुभूतो महेश्वरः॥ सर्वाशयो दर्भशायी सर्वेषां प्राणिनां प
तिः॥ ७६॥ देवदेवः सुखासक्तः सदसत्सर्वरत्नवित्॥ कैलासशिखरावासी हिमवद्गिरिसंश्रयः॥ ७७

कूलहारी कूलकर्ता बहुबीजो बहुप्रसः ॥ वणिजो वर्धनो वृक्षो नकुलश्चंदनछदः ॥ १८ ॥ सारग्रीवो महा
जंतुरलकश्च महौषधिः ॥ सिद्धार्थकारी सिद्धार्थश्छंदो व्याकरणानि च ॥ १९ ॥ सिंहनादः सिंहदंष्ट्रः सिं सिंहगः
हवाहनः ॥ प्रभावात्मा जगत्कालस्थालो लोकहितस्तरुः ॥ २० ॥ सारंगः सुखवक्रांगः केतुमाली स्व
भावनः ॥ भूतालयो भूतपतिरहोरात्रमनिंदकः ॥ २१ ॥ आसनः सर्वभूतानां निलयश्च विभुर्भवः ॥
अमोघः सर्वभूषाढ्यो भाजनः प्राणहारकः ॥ २२ ॥ धृतिमान्मतिमान्दक्षः सत्कृतश्च युगाधिपः ॥
गोपालो गोपतिर्ग्रामो गोचर्मवसनो हरः ॥ २३ ॥ हिरण्यबाहुश्च तथा गुहापालः प्रवेशकः ॥ प्रति
ष्ठायी महाहर्षो जितकामो जितेंद्रियः ॥ २४ ॥ गांधारश्च सुरालश्च तपः कर्मरतिर्धनः ॥ महागी
तो महाब्रह्मा ह्यप्सरोगणसेवितः ॥ २५ ॥ महाकेतुं कर्मधाता नैकतानश्चराचरः ॥ आवेदनी
य आवेशः सर्वगंधसुखावहः ॥ २६ ॥ तोरणस्तारणो वायुः परिधावति चैकतः ॥ संयोगो वर्द्ध हेरंब
नो वृद्धो महावृद्धो गणाधिपः ॥ २७ ॥ नित्यो धर्मसहायश्च देवासुरपतिः पतिः ॥ अयुक्तो युक्तबाहु ५

5

श्चाद्धिविधश्चवसुपर्वणः॥१८॥ आषाढश्चसुषाढश्च ध्रुवो हरि हयो हरिः॥ वसुरावर्तमान्विस्यो
[redacted] वसुश्रेष्ठो महामदः॥१
९॥ शिरो हारी च मर्षी च सर्वलक्षणभूषितः॥ अक्षरश्चाक्षयो योगी सर्वयोगी महाबलः॥२०॥ स
माम्नायो समाम्नाय स्तीर्थदेवो महाद्युतिः॥ निर्जीवो जीवनो मंत्र अनिंद्यो बहुकर्कशः॥२१॥ रत्न
प्रभूतो रत्नांगो महार्णवनिनादधृक्॥ मूलो विशारदो स मलो व्यक्तो व्यक्तः सनातनः॥२२॥ आरोह
णो निरोहश्च शैलहारी महातपाः॥ सेनाकल्पो महाकल्पो युगोयुगकरो हरिः॥२३॥ यु
गरूपो महारूपः पवनो गहनो नगः॥ न्याय निर्वापणो नादः पंडितो ह्यचलोपमः॥२४॥ बहुमालो
महामालः सुमालो बहुलोचनः॥ विस्तारो लवणः कूरः कालुमासफलोदयः॥२५॥ वृषभो वृ
षभांगांगो मणि बंधो र्जटाधरः॥ इंद्रो विसर्गः सुमुखः सुरः सर्वा युधः सहः॥२६॥ निवेशनः सुधन्वा
च त्रिगुणं गंधो महाहनुः॥ गंधमाली च भगवानुत्थानं सर्वकर्मणां॥२७॥ मान्यमानो बहुलोबाहुः

6

सकलः सर्वलोचनः ॥ उद्रस्थालीकरस्थालीऊर्ध्वसंहतलोचनं ॥ ९८ ॥ छत्रपत्रः सुविख्यातः सर्व
लोकाश्रयोमहान् ॥ मुंडोविरूपोविकृतोदंडीमुंडोविकुंडलः ॥ ९९ ॥ हर्यक्षः ककुभो वज्री दीप्तवर्चःस
हस्रपात् ॥ सहस्रमूर्धा देवेंद्रः सर्वभूतमयो हरिः ॥ १०० ॥ सहस्रबाहुः सर्वांगः शरण्यः सर्वकर्मकृत् ॥
पवित्रः स्निग्धधुर्मंत्रः कनिष्ठः कृष्णपिंगलः ॥ १०१ ॥ ब्रह्मदंडविनिर्वातः शरघ्नः शरचापधृक् ॥ पद्मग
र्भोमहागर्भोब्रह्मगर्भोजलोद्भवः ॥ १०२ ॥ गभस्तिर्ब्रह्मकृद्ब्रह्माब्रह्मविद्ब्राह्मणोगतिः अनंतरूपोनैका
त्मातिग्मतेजात्मसंभवः ॥ १०३ ॥ ऊर्ध्वगात्मापशुपतिर्वातरंहोमनोजवः ॥ चंदनी पद्ममालीच
स्वगुणोत्तरणोनरः ॥ १०४ ॥ कर्णिकारोमहास्रग्वीनीलमौलीपिनाकधृक् ॥ उमापतिरुमाकांतो
जाह्नवीहृदयंगमः ॥ १०५ ॥ वीरोवराहोवरदोवरेशश्चमहामनाः ॥ महाप्रसादः स्वनघः शत्रुहा श्वे
तपिंगलः ॥ ६ ॥ प्रीतात्मापपतात्माचसंयतात्माप्रधानधृक् ॥ सर्वपार्श्वसुतस्ताक्ष्यो धर्मसाधा
रणोवरः ॥ ७ ॥ चराचरात्मासूक्ष्मात्मागोवृषोगोवृषेश्वरः ॥ साध्यर्षिर्वसुरादित्यो विवस्वान्सविता हेरंब०
६

मृगः ॥८॥ व्यासः सर्वस्य संक्षेपो विस्तारः पर्ययो नयः ॥ ऋतुः संवत्सरो मासः [illegible] पक्षः सं
ख्या समापनः ॥९॥ कला काष्ठा लवो मात्रा मुहूर्त्तोहः क्षपाः क्षणाः ॥ विश्वक्षेत्रं प्रजाबीजं लिंगमाद्यस्तु
निर्मलः ॥१०॥ सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥ स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपं ॥११॥
निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः ॥ देवासुरगुरुर्देवो देवासुरनमस्कृतः ॥१२॥ देवासुरमहामा
त्रो देवासुरसमाश्रयः ॥ देवासुरगणाध्यक्षो देवासुरगणायनः ॥१३॥ देवादिदेवो देवर्षिर्देवासु
रवरप्रदः ॥ देवासुरेश्वरो देवो देवासुरमहेश्वरः ॥१४॥ सर्वदेवमयोऽचिंत्यो देवानामात्मसंभवः ॥
उद्भिज्जं त्रिक्रमो वैद्यो ध्विराजो विरजो वरः ॥ इभो हस्तिमुखो व्याघ्री देवसिंहो नरर्षभः ॥१५॥ विबुधाग्रव
रः श्रेष्ठः सर्वदेवोत्तमोत्तमः ॥ गुरुः कांतो निजः सर्वः पवित्रः सर्ववाहनः ॥१६॥ प्रयुक्तः शोभनो वज्र
ईशानः प्रभुरव्ययः ॥ श्रृंगी श्रृंगप्रियो बभ्रू राजराजो निरामयः ॥१७॥ अविरामः सुशरणो विरामः स
र्वसाधनः ॥ ललाटाक्षो विश्वदेहो हरिणो ब्रह्मवर्चसी ॥१८॥ स्थावराणां पतिश्चैव नियमेंद्रियवर्द्ध

हेरंब०

नः॥ सिद्धार्थःसर्वसिद्धार्थो नित्यः सत्यव्रतःशुचिः॥१९॥ एतद्दिव्यं सारं ब्रह्म मुक्तानां परमा गतिः॥ विमुक्तो
द्दीर्घतेजाश्च श्रीमान् श्रीवर्द्धनो जगत्॥२०॥ यथा प्रसादो भगवानिति भक्त्या स्तुतो मया॥ यं न ब्रह्मादयो
देवा विदुर्यं न महर्षयः॥२१॥ तं स्तवाम्यहमाद्यं च कः स्तोष्यति जगत्प्रभुं॥ भक्तिं चैव पुरस्कृत्य समया
यज्ञपतिर्वसुः॥२२॥ ततोनुज्ञामयासेवस्तुतो मतिमतांवरः॥ शिव एवं स्तुतो देवैर्नामभिः पुष्टिव
त्या र्धनैः॥२३॥ नित्ययुक्तः शुचिर्भूत्वा प्राप्नोत्यात्मानमात्मनः॥ एतद्धि परमं ब्रह्म स्वयं गीतं स्वयंभुवा॥२४॥
ऋषयश्चैव देवाश्च स्तुवंत्येतेन तत्परं॥ स्तूयमानो महादेवः प्रीयते चात्मनामतः॥२५॥ भ
क्तानुकंपी भगवानात्मसंस्थान्करोति तान्॥ तथैव च मनुष्येषु यच्चस्त्रयप्रधानतः॥२६॥ आ
स्तिकः श्रद्दधानश्च बहुभिर्जन्मभिः स्तवैः॥ जायतो यत्नपंतश्च व्रजंतो गतिसंस्थिताः॥२७॥
स्तुवंति स्तूयमानं च चतुष्पथिरमंति च॥ जन्मकोटिसहस्रेषु नानासंसारयोनिषु॥२८॥ जंतो
र्विशुद्धपापस्य भवे भक्तिः प्रजायते॥ उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः॥२९॥ एतद्देवेषु दुष्प्रापं हेरबं०
७

मानुष्ये च न लभ्यते ॥ निर्विघ्ना निश्चला भद्रे भक्तिरव्यभिचारिणी ॥ ३० ॥ तस्यैव च प्रसादेन भक्तिरु
त्पद्यते नृणां ॥ यया याति परां सिद्धिं तद्भावगतमानसः ॥ ३१ ॥ ये सर्वभावोपहताः परत्वेन भवेन्न
राः ॥ प्रसन्नवत्सलो देवः संसारात्तान्समुद्धरेत् ॥ ३२ ॥ एवमन्ये विकुर्वन्ति देवाः संसारमोचनं ॥ म
नुष्याणां महादेवा हन्त्यत्रापि तपोबलात् ॥ ३३ ॥ इति ते नैष्कल्याय भगवान्स दसत्सलिः । क्रान्ति
वासाच्युतं ते वेल्लाढिनः शुद्धबुद्धयः ॥ ३४ ॥ स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत् ॥ ब्रह्मा प्रोवा
च शक्राय शक्रः प्रोवाच मृत्यवे ॥ ३५ ॥ मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तं डिमागमत् ॥ महतातप
सा प्राप्तं तण्डिना ब्रह्मसद्मनि ॥ ३६ ॥ तण्डिः प्रोवाच शुक्राय गौतमायाह भार्गवः ॥ वैवस्वताय
मनवे गौतमः प्राह साधवे ॥ ३७ ॥ नारायणाय साध्याय मनुरिष्टाय धीमते ॥ यमाय प्राह भ
गवान्साध्यो नारायणोच्युतः ॥ ३८ ॥ नाचिकेताय भगवानाह वैवस्वतो यमः ॥ मार्कण्डेयाय वा
र्ष्णेयो नाचिकेतोभ्यभाषत ॥ ३९ ॥ मार्कण्डेयान्मया प्राप्तो नियमेन जनार्दनः ॥ तवाप्यहममित्रघ्नं

8

रावंदयोयथाश्रुते ॥४०॥ स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदेन संमितं ॥ नास्य विघ्नानि कुर्वंति दान
वा यक्षराक्षसाः ॥४१॥ पिशाचा यातुधाना वा गुह्यका भुजगा अपि ॥ यः पठेत्प्रयतः प्रातर्ब्रह्म
चारी जितेंद्रियः ॥४२॥ अभग्नयोगो वर्षं तु अश्वमेधफलं लभेत् ॥१४३॥ ॥इत्याकाशभैर
वतंत्रे कल्पे हरिहरब्रह्मविरचितं शरभसहस्रनामस्तोत्रं संपूर्णं ॥ ॥ ॥ ॥